# Shri Subrahmanya Shodashanama Stotram

# શ્રીસુબ્રહ્મણ્યષોડશનામસ્તોત્રમ્

## Document Information

Text title : shrii subrahmaNyaShoDashanaamastotram 2

File name : subra16naamastotra.itx

Category : subrahmanya, stotra, ShoDasha

Location : doc_subrahmanya

Transliterated by : Antaratma antaratma at Safe-mail.net

Proofread by : Antaratma antaratma at Safe-mail.net

Description-comments : shaNkarasaMhitaayaaM shivarahasyakhaNDe, See corresponding nAmAvaliH

Latest update : March 15, 2006, March 26, 2017

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 10, 2024

*sanskritdocuments.org*

# Shri Subrahmanya Shodashanama Stotram

# શ્રીસુબ્રહ્મણ્યષોડશનામસ્તોત્રમ્

ધ્યાનમ્ -
ષડ્વક્ત્રં શિખિવાહનં ત્રિનયનં ચિત્રામ્બરાલઙ્કૃતં
શક્તિં વજ્રમસિં ત્રિશૂલમભયં ખેટં ધનુશ્ચક્રકમ્ ।
પાશં કુક્કુટમઙ્કુશં ચ વરદં દોર્ભિર્દધાનં સદા
ધ્યાયામીપ્સિતસિદ્ધિદં શિવસુતં સ્કન્દં સુરારાધિતમ્ ॥

સુબ્રહ્મણ્યં પ્રણામ્યહં સર્વજ્ઞં સર્વગં સદા ।
અભીપ્સિતાર્થ સિદ્ધ્યર્થં પ્રવક્ષ્યેનામષોડશમ્ ॥

ૐ પ્રથમોજ્ઞાનશક્ત્યાત્મા દ્વિતીયો સ્કન્દ એવ ચ ।
અગ્નિગર્ભસ્તૃતીયસ્તુ બાહુલેયશ્ચતુર્થકઃ ॥ ૧॥

ગાઙ્ગેયઃ પઞ્ચમઃ પ્રોક્તઃ ષષ્ઠઃ શરવણોદ્ભવઃ । (પઞ્ચમોવિધાત્)
સપ્તમઃ કાર્તિકેયશ્ચ કુમારશ્ચાષ્ટમસ્તથા ॥ ૨॥ (કુમારસ્યાદથાષ્ટકઃ)

નવમઃ ષણ્મુખઃ પ્રોક્તો દશમસ્તારકાન્તકઃ । (ષણ્મુખશ્ચૈવ દશમઃકુક્કુટધ્વજઃ)
એકાદશશ્ચ સેનાનીઃ ગુહો દ્વાદશ એવ ચ ॥ ૩॥ (એકાદશઃશક્તિધરો)

ત્રયોદશો બ્રહ્મચારી શિવતેજાશ્ચતુર્દશઃ । (ષાણ્માતુર ચતુર્દશઃ)
ક્રૌઞ્ચદારી પઞ્ચદશઃ ષોડશઃ શિખિવાહનઃ ॥ ૪॥ (ક્રૌઞ્ચભિત્ પઞ્ચદશકઃ)

ષોડશૈતાનિ નામાનિ યઃ પઠેદ્ભક્તિસંયુતઃ ।
બૃહસ્પતિસમો વાચિ બ્રહ્મતેજિયુતો ભવેત્ ।
યદ્યત્પ્રાર્થયતે મર્ત્યસ્તત્સર્વં લભતે ધ્રુવમ્ ॥ ૫॥

(alternative phalashrutiH
એતત્ ષોડશનામાનિ જપેત્ સમ્યક્સદાદરમ્ ।
વિવાહેદુર્ગમે માર્ગે દુર્જયે ચ તથૈવચ ॥
કવિત્વેચ મહાશસ્ત્રે વિજ્ઞાનાર્થીફલંલભેત્ ।
કન્યાર્થી લભતેકન્યા જયાર્થી લભતે જયમ્ ॥

પુત્રાર્થી પુત્રલાભશ્ચ ધનાર્થી લભતે ધનમ્ ।
આયુરારોગ્ય વશ્યશ્ચ ધનધાન્ય સુખાવહમ્ ॥

॥ ઇતિ શ્રી શઙ્કરસંહિતાયાં શિવરહસ્યખણ્ડે
શ્રી સુબ્રહ્મણ્યષોડશનામસ્તોત્રમ્ ॥)

Encoded and proofread by antaratma at Safe-mail.net

*Shri Subrahmanya Shodashanama Stotram*

pdf was typeset on June 10, 2024

Please send corrections to *sanskrit@cheerful.com*